# नवग्रह स्तोत्रम्

जपाकुसुम संकाशं काश्यपेयं महाद्युतिम् ।
तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ १॥

दधिशङ्ख तुषाराभं क्षीरोदार्णव संभवम् ।
नमामि शशिनं सोमं शम्भोर्मुकुट भूषणम् ॥ २॥

धरणी गर्भ संभूतं विद्युत्कान्ति समप्रभम् ।
कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ॥ ३॥

प्रियङ्गुकलिका श्यामं रूपेणा प्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥ ४॥

देवानां च ऋषीणां च गुरुं काञ्चन संनिभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥ ५॥

हिमकुन्द मृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम् ॥ ६॥

नीलांजन समाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्ड संभूतं तं नमामि शनैश्चरम् ॥ ७॥

अर्धकायं महावीर्यं चन्द्रादित्य विमर्दनम् ।
सिंहिका गर्भ संभूतं तं राहुं प्रणमाम्यहम् ॥ ८॥

पलाश पुष्प संकाशं तारकाग्रह मस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ ९॥

इति व्यास मुखोद्गीतं यः पठेत्सुस माहितः ।
दिवा वा यदि वा रात्रौ विघ्नशान्ति र्भविष्यति ॥ १०॥

नरनारी नृपाणां च भवे द्दुःस्वप्न नाशनम् ।
ऐश्वर्य मतुलं तेषां आरोग्यं पुष्टिवर्धनम् ॥

ग्रह नक्षत्रजाः पीडास् तस्कराग्नि समुद्भवाः ।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ॥

॥ इति श्रीव्यास विरचितं नवग्रह स्तोत्रं सम्पूर्णम् ॥